चरति पर्पा० ष्ठन् अश्विकः अश्वेन चारिणि त्रि० स्त्रियां ङीप्। कस्यायमश्वः अज्ञाते क। अज्ञातस्वामिके अश्वे। कुत्सितोऽश्वः क। अश्वकः। कुत्सितेऽश्वे अश्व इव संज्ञायां कन् अश्वसदृशसंज्ञावति पु०। अश्व इव प्रकृतिकृतौ कन्। अश्वप्रतिकृतौ। अश्वानां समूहः छ यत् च अश्वीयम् अश्व्यञ्च घोटकसमूहे न०। एतदन्तस्य पादस्य बहुव्रीहौ हस्त्यादि० नान्त्यलोपः अश्वस्य पादाविव पादावस्य अश्वपाद इत्येव। जातित्वेऽपि अजा० स्त्रियां टाप्। अश्वा अश्वजातिस्त्रियाम् "अश्वे इव विषिते हासमाने" ऋ०२,२२,१,।

**अश्वकन्दा** स्त्री अश्वस्य मेढ्रमिव कन्दोमूलमस्याः। अश्वगन्धाख्यवृक्षे। वा कप् अश्वकन्दिकाप्यत्र।

**अश्वकर्ण** पु० अश्वस्य कर्णइव पत्रमस्य। १स्वनामख्याते साल वृक्षे। "पूतिकाश्वकर्णागुरूणि कालेयकल्के, सुश्रु० स्वार्थे कन्। अश्वकर्णकोऽप्यत्र। ६त०। २अश्वस्य कर्णे।

**अश्वखरज** पु० अश्वस्य खरी च, अश्वा च खरस्य वा ताभ्यां जायते पुंवद्भावः। खचरे घोटकभेदे। खराश्वजोऽप्यत्र।

**अश्वखुर** पु० अश्वस्य खुरमिवाकृतिरस्य। (नखीति)ख्याते १गन्धद्रव्ये। २अपराजितायाम् स्त्री।

**अश्वकिनी** स्त्री अश्वस्य कं मुखं तत् सदृशाकारोऽस्त्यस्य इनि ङीप्। अश्विनीनक्षत्रे तस्याः श्रीपत्युक्त्या तुरगशीर्षाकारतायाः अश्लेषाशब्दे ४८० पृष्ठे उक्तत्वात्तथात्वम्।

**अश्वक्रन्द** पु० देवसेनापतिभेदे "अश्वक्रन्देन वीरेण रेणुकेन च पक्षिराट्" भा०आ०प०अमृताहरणे देवगरुड़युद्धवर्णने।

**अश्वगन्धा** स्त्री अश्वस्य गन्ध एकदेशोमेढ्रमिव मूलमस्याः। वराहकर्णतुल्यपत्रे स्वनामख्याते क्षुद्रवृक्षभेदे। "गन्धान्तो वाजिनामादिरश्वगन्धा हयाह्वया। वराहकर्णी वरदाऽवरोहा कुष्ठघातिनी। अश्वगन्धानिलश्लेष्मपित्तशोथक्षयापहा। वल्या रसायनी तिक्ता कषायोष्णातिपिच्छला" भा०प्र० उक्तेः हयादिकगन्धान्तनामिका हयनामिका च "यवाश्वगन्धायष्ट्याह्वैस्तिलैश्चोद्वर्त्तनम् हितम्"। "शतावर्य्यश्वगन्धाभ्यां वायस्येरण्डजीवनैः" इति च सुश्रु०।

**अश्वगन्धातैल** न०चक्रदत्तोक्ते तैलभेदे यथा 'भल्लातकवृहती-फलदाड़िमफलकल्कसाधितं कुरुते। लिङ्गं मर्द्दनविधिना-कटुतैलं वाजिलिङ्गाभम्॥ कनकरसमर्दनवर्त्तितहयगन्धा-मूलविश्वपर्य्युषितम्। माहिषमिह नवनीतं गतबीजे कनकफलमध्ये॥ गोमयगाढ़ोद्वर्त्तितं पूर्व्वं पश्चादनेन संलिप्तम्। भवति हयलिङ्गसदृशं लिङ्गं कठिनाङ्गनादयितम्। अश्वगन्धावरीकुष्ठमांसीसिंहीफलान्वितम्। चतुर्गुणेन दुग्धेन तिलतैलं विपाचयेत्। स्तनलिङ्गकर्णपालिवर्द्धनं म्रक्षणादिदम्"।

**अश्वगोयुग** न० अश्व+द्वित्वे गोयुगच्। अश्वयुग्मे।

**अश्वगोष्ठ** न० अश्वानां स्थानं पशुनामत्वात् स्थानार्थे गोष्ठच्। अश्वस्थाने वाजिशालायाम् विवरणमश्वशालाशब्दे।

**अश्वग्रीव** पु०अश्वस्य ग्रीवेव ग्रीवाऽस्य। दानवभेदे "चत्वारिंशद्दनोः पुत्राः" इत्युपक्रम्य। "अश्वग्रीवश्च सूक्ष्मश्च तुहुण्डश्च महाबलः" भा०आ०प०। स एवांशावतारे रोचमान नृपतिरभूत् यथोक्तं तत्रैव। "अश्वग्रीव इति ख्यातः सत्ववान् योमहासुरः। रोचमान इति ख्यातः पृथिव्यां सोऽभवन्नृपः"। २विष्णोरवतारभेदे हयग्रीवे अश्वशिरःशब्दे विवृतिः। यदुवंश्यचित्रकस्य पुत्रभेदे अश्वबाहुशब्दे विवृतिः।

**अश्वघ्न** पु० अश्वं हन्ति अमनुष्यकर्त्तृकत्वात् हन—टक् उप० स०। करवीरे तस्य अश्वनाशकतया तथात्वम्।

**अश्वचक्र** न० ६त०। १अश्वसमूहे २अश्वाकारे नरपतिजयचर्य्योक्ते चक्रभेदे विवरणम् चक्रशब्दे। जाम्बवतीतनयेन कृष्णात्मजेन हते ३शम्बरदैत्यसेनापतिभेदे पु० "वृत्तोरुरत्यायतपीनबाहुरेतेन संख्ये निहतोऽश्वचक्रः। को नाम शाम्बस्य महारथस्य रणे समक्षं रथमभ्युदीयात्" भा०व०प०।

**अश्वचिकित्सक** पु० अश्वानां चिकित्सकः। अश्वानां रोगनिवारकेऽश्व वैद्ये चिकित्साविधिश्च जयदत्तकृतेऽश्वशास्त्रे दृश्यः। [यदत्तकृतेऽश्वशास्त्रे दृश्या।

**अश्वचिकित्सा** स्त्री ६त० अश्वरोगनिवारणोपाये सा च ज-

**अश्वचेष्टित** न० ६त० १वाजिचेष्टिते २शुभाशुभसूचके शकुनभेदे च तद्विवृतिः वृ०स० यथा" उत्सर्गान्न शुभदमासनोपरिस्थं वामे च ज्वलनमतोऽपरं प्रशस्तम्। सर्वाङ्गज्वलनमवृष्टिदं हयानां द्वे वर्षे, दहनकणाश्च धूपनं वा। अन्तःपुरं नाशमुपैति मेढ्रे कोशः क्षयं यात्युदरे प्रदीप्ते। पायौ च पुच्छे च पराजयः स्याद् वक्त्रोत्तमाङ्गज्वलने जयश्च। स्कन्धासनांसज्वलनं जयाय बन्धाय पादज्वलनं प्रदिष्टम्। ललाटवक्षोऽक्षिभुजेषु धूमः पराभवाय ज्वलनं जयाय। नासापुटप्रोथशिरोऽश्रुपातनेत्रेषु रात्रौ ज्वलनं जयाय। पालाशताम्रासितकर्बुराणां नित्यं शुकाभस्य सितस्य चेष्टम्। प्रद्वेषो यवसाम्भसां प्रपतनं स्वेदो निमित्ताद्विना कम्पो वा वदनाच्च रक्तपतनं धूमस्य वा सम्भवः। अस्वप्नश्च विरोधिता निशि दिवा निद्रालसध्यानता सादोऽधोमुखता